## विभाषाञ्चेरदिक्स्त्रियाम् । (८/२०८०)

अञ्चत्यन्तात् प्रातिपदिकात् [1]अदिक्स्त्रियां वर्तमानात् स्वार्थे विभाषा खः प्रत्ययो भवति । प्राक्, [2]प्राचीनम् । अर्वाक्, अर्वाचीनम् । अदिक्स्त्रियाम् इति किम् ? प्राची दिक् । [3]प्रतीची दिक् । दिग्ग्रहणं किम् ? प्राचीना ब्राह्मणी । [4]अवाचीना शिखा । स्त्रीग्रहणं किम् ? प्राचीनं दिग्रमणीयम् । [5]उदीचीनं दिग्रमणीयम् ॥

## जात्यन्ताच्छ बन्धुनि । (९/२०८१)

[6]जात्यन्तात् प्रातिपदिकात् बन्धुनि वर्तमानात् स्वार्थे छः प्रत्ययो भवति । बध्यतेऽस्मिन्न् जातिः इति बन्धुशब्देन द्रव्यमुच्यते । येन ब्राह्मणत्वादिजाति[7]र्व्यज्यते तद्बन्धु द्रव्यम् । ब्राह्मणजातीयः, क्षत्रियजातीयः, [8]वैश्यजातीयः इति ब्राह्मणादिरेवोच्यते । बन्धुनि इति किम् ? ब्राह्मणजातिः शोभना ॥

## स्थानान्ताद्विभाषा सस्थानेनेति चेत् । (१०/२०८२)

स्थानान्तात् प्रातिपदिकात् विभाषा छः प्रत्ययो भवति सस्थानेन चेत् स्थानान्तमर्थवद् भवति । सस्थानः इति [9]तुल्य उच्यते, समानं स्थानमस्य इति कृत्वा । पित्रा तुल्यः पितृस्थानीयः, [10]पितृस्थानः । मातृस्थानीयः, मातृस्थानः । राजस्थानीयः, राजस्थानः । सस्थानेन इति किम् ? गोस्थानम् । अश्वस्थानम् । इतिकरणो विवक्षार्थः । तेन बहुव्रीहिः [11]सस्थानशब्दार्थ[12]मुपस्थापयति, न तत्पुरुषः । चेच्छब्दः सम्बन्धार्थः । द्वयोर्विभाषयो[13]र्नित्या विधयः इति [14]पूर्वत्र [15]नित्यविधयः ॥

## किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे । (११/२००४)

किम एकारान्तात् तिङन्ताद[16]व्ययेभ्यश्च यो विहितो घः स किमेत्तिङव्ययघः, तदन्तात् प्रातिपदिकात् अद्रव्यप्रकर्षे[17] आमु[18]प्रत्ययो भवति । यद्यपि [19]द्रव्यस्य स्वतः प्रकर्षो नास्ति, तथापि[20] क्रियागुणस्थः प्रकर्षो यदा द्रव्ये उपचर्यते तदाऽयं प्रतिषेधः । [21]क्रियागुणयोरेव [22]अयं प्रकर्षे प्रत्ययः[23] । [24]पूर्वाह्णेतराम् । पूर्वाह्णेतमाम् । [25]पचतितराम् । पचतितमाम् । [26]उच्चैस्तराम् । उच्चैस्तमाम्[27] । अद्रव्यप्रकर्षे इति किम् ? उच्चैस्तरः । [28]उच्चैस्तमः ॥

---

1. अदिक्स्त्रियाम् नास्ति क. ह. 2. प्राचीना दिग् रमणीया ह. 3. उदीची ब. क. फ. 4. उदीचीना क. 5. उदाहरणमिदं नास्ति क. ड. 6. जातिशब्दान्तात् फ. 7. व्यवतिष्ठते ड. 8. शूद्रजातीयः इत्यधिकम् ब. 9. तुल्यस्थानम् फ. स्थानतुल्यम् ह, जातितुल्यम् क. 10. पितृस्थानः नास्ति फ. 11. सस्थानशब्दोऽर्थम् प्रा.भा. 12. उपपादयति फ. 13. मध्ये इत्यधिकम् ब.क.ड.फ. 14. पूर्वसूत्रे ह, पूर्वसूत्रेण क. ड. 15. नित्यः प्रत्ययः ब. क.ड.ह.फ. 16. अव्ययात् च क.ड, तिङोऽव्ययेभ्यः च.ह. 17. वर्तमानात् इत्यधिकम् क.फ. 18. प्रत्ययो नास्ति ब.क. ड. 19. द्रव्यस्य नास्ति क. 20. गुणक्रियास्थः ब.फ. 21. तदा इत्यधिकम् क. 22. अयं नास्ति ह. 23. इति इत्यधिकम् क. 24. एत् इत्यधिकम् ह, एतः इत्यधिकम् ड. 25. तिङ इत्यधिकम् क. ड. 26. अव्यय इत्यधिकम् ड.ह. 27. नीचैस्तराम् नीचैस्तमाम् इत्यधिकम् ड. ह. 28. उच्चैस्तमः नास्ति क. ड.